# mRityunjayasahasranAmAvaliH

# मृत्युञ्जयसहस्रनामावलिः

## Document Information

Text title : Mrityunjaya Sahasranamavali 1000 names

File name : mRityunjayasahasranAmAvaliH.itx

Category : sahasranAmAvalI, shiva, nAmAvalI

Location : doc_shiva

Author : Traditional

Proofread by : Malathi Ravi

Description-comments : rudrayAmale tantre devIrahasye. See corresponding stotram

Latest update : March 7, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# मृत्युञ्जयसहस्रनामावलिः

श्रीगणेशाय नमः ।
श्रीभैरव उवाच ।
अस्य श्रीमहामृत्युञ्जसहस्रनामस्तोत्रमन्त्रस्य,
भैरव ऋषिः, उष्णिक् छन्दः, श्रीमहामृत्युञ्जयो देवता,
ॐ बीजं, जुं शक्तिः, सः कीलकं, पुरुषार्थसिद्धये
सहस्रनाम जपे विनियोगः ॥

ध्यानम् -
उद्यच्चन्द्रसमानदीप्तिममृतानन्दैकहेतुं शिवं
ॐ जुं सः भुवनैकसृष्टिप्र(वि)लयोद्धृत्येकरक्षाकरम् ।
श्रीमत्तारदशार्णमण्डिततनुं त्र्यक्षं द्विबाहुं परं
श्रीमृत्युञ्जयमीड्यविक्रमगुणैः पूर्णं हृदब्जे भजे ॥

अथ नामावलिः -
ॐ जुं सः हौम् । महादेवाय । मन्त्रज्ञाय । मानदायकाय (मन्त्रेशाय
मन्त्रनायकाय) । मानिने । मनोरमाङ्गाय । मनस्विने । मानवर्धनाय ।
मायाकर्त्रे । मल्लरूपाय । मल्लाय । मारान्तकाय । मुनये । महेश्वराय ।
महामान्याय । मन्त्रिणे । मन्त्रिजनप्रियाय । मारुताय । मरुतां
श्रेष्ठाय । मासिकाय नमः । २०

ॐ पक्षिकाय नमः । अमृताय । मातङ्गकाय । मत्तचित्ताय ।
मत्तचिदे । मत्तभावनाय । मानवेष्टप्रदाय । मेषाय ।
मेनकापतिवल्लभाय । मानकायाय । मानस्तेयिने । मारयुक्ताय ।
जितेन्द्रियाय । जयाय । विजयदाय । जेत्रे । जयेशाय । जयवल्लभाय ।
डामरेशाय । विरूपाक्षाय नमः । ४०

ॐ विश्वभोक्त्रे नमः । विभावसवे । विश्वेशाय । विश्वनाथाय ।
विश्वसुवे । विश्वनायकाय (विश्वताताय) । विनेत्रे । विनयिने ।

वादिने । वाक्प्रदाय । वाग्भवाय । वटवे । स्थूलाय । सूक्ष्माय ।
अचलाय । लोलाय । लोलजिह्वाय । करालकाय ।
विराधेयाय । विरागीनाय नमः । ६०

ॐ विलासिने नमः । लास्यलालसाय । लोलाक्षाय । लोलधिये । धर्मिणे ।
धनदाय । धनदार्चिताय । धनिने । ध्येयाय । अध्येयाय । धर्म्याय ।
धमर्यमयोदयाय । दयावते । देवजनकाय । देवसेव्याय । दयापतये ।
ढुलिचक्षुषे । दरीवासाय । दम्भिने । देवमयात्मकाय नमः । ८०

ॐ कुरूपाय नमः । कीर्तिदाय । कान्ताय । क्लीबाय । अक्लीबात्मकाय ।
कुजाय । वुधाय । विद्यामयाय । कामिने । कामान्तकाय । कालान्तकाय ।
अन्धकान्तकाय । जीवाय । जीवप्रदाय । शुक्राय । शुद्धाय ।
जर्मप्रदाय । अनघाय । शनैश्चराय । वेगगतये नमः । १००

ॐ वाचालाय नमः । राहवे । अव्ययाय । केतवे । कारापतये । कालाय ।
सूर्याय । अमितपराक्रमाय । चन्द्राय । भद्रप्रदाय । भास्वते ।
भाग्यदाय । भर्गरूपभृते । क्रूराय । धूर्ताय । वियोगिने । सङ्गिने ।
गङ्गाधराय । गजाय । गजाननप्रियाय नमः । १२०

ॐ गीताय नमः । गानिने । स्नानार्चन प्रियाय । परमाय । पीवराङ्गाय ।
पार्वतीवल्लभाय । महते । परात्मकाय । विराड्वाससे । वानराय ।
अमितकर्मकृते । चिदानन्दिने । चारुरूपाय । गारुडाय । गरुडप्रियाय ।
नन्दीश्वराय । नयाय । नागाय । नागालङ्कार-मण्डिताय ।
नागहाराय नमः । १४०

ॐ महानागाय नमः । गोधराय । गोपतये । तपसे । त्रिलोचनाय ।
त्रिलोकेशाय । त्रिमूर्तये । त्रिपुरान्तकाय । त्रिधामयाय । लोकमयाय ।
लोकैकव्यसनापहाय । व्यसनिने । तोषिताय । शम्भवे । त्रिधारूपाय ।
त्रिवर्णभाजे । त्रिज्योतिषे । त्रिपुरीनाथाय । त्रिधाजान्ताय ।
त्रिधागतये नमः । १६०

ॐ त्रिधागुणिने नमः । विश्वकर्त्रे । विश्वभर्त्रे । अधिपूरुषाय
(त्रिपूरुषः) । उमेशाय । वासुकये । वीराय । वैनतेयाय । विचारकृते ।
विवेकाक्षाय । विशालाक्षाय । अविधये । विधये । अनुत्तमाय ।
विद्यानिधये । सरोजाक्षाय । निःस्मराय । स्मरनाशनाय । स्मृतिमते ।
स्मृतिदाय नमः । १८०

ॐ स्मार्ताय नमः । ब्रह्मणे । ब्रह्मविदां वराय । ब्राह्मव्रतिने ।
ब्रह्मचारिणे । चतुराय । चतुराननाय । चलाचलाय । अचलगतये ।
वेगिने । वीराधिपाय । वराय । सर्ववासाय । सर्वगतये । सर्वमान्याय ।
सनातनाय । सर्वव्यापिने । सर्वरूपाय । सागराय ।
समेश्वराय नमः । २००

ॐ समनेत्राय नमः । समद्युतये । समकायाय । सरोवराय । सरस्वते ।
सत्यवाचे । सत्याय । सत्यरूपाय । सुधिये । सुखिने । सुराजे ।
सत्याय । सत्यमतये । रुद्राय । रौद्रवपुषे । वसवे । वसुमते ।
वसुधानाथाय । वसुरूपाय । वसुप्रदाय नमः । २२०

ॐ सर्वदेवानामीशानाय नमः । सर्वबोधिनामीशानाय । ईशाय ।
अवशेषाय । अवयविने । शेषशायिने । श्रियः पतये । इन्द्राय ।
चन्द्रावतंसिने । चराचरजगत्स्थितये । स्थिराय । स्थाणवे ।
अणवे । पीनाय । पीनवक्षसे । परात्पराय । पीनरूपाय । जटाधारिणे ।
जटाजूटसमाकुलाय । पशुरूपाय नमः । २४०

ॐ पशुपतये नमः । पशुज्ञानिने । पयोनिधये । वेद्याय । वैद्याय ।
वेदमयाय । विधिज्ञाय । विधिमते । मृडाय । शूलिने । शुभङ्कराय ।
शोभ्याय । शुभकर्त्रे । शचीपतये । शशाङ्कधवलाय ।
स्वामिने । वज्रिणे । शङ्खिने । गदाधराय । चतुर्भुजाय नमः । २६०

ॐ अष्टभुजाय नमः । सहस्रभुजमण्डिताय । स्रुवहस्ताय ।
दीर्घकेशाय । दीर्घाय । दम्भविवर्जिताय । देवाय । महोदधये ।
दिव्याय । दिव्यकीर्तये । दिवाकराय । उग्ररूपाय । उग्रपतये ।
उग्रवक्षसे । तपोमयाय । तपस्विने । जटिलाय । तापिने । तापघ्ने ।
तापवर्जिताय नमः । २८०

ॐ हविषे नमः । हराय । हयपतये । हयदाय । हरिमण्डिताय ।
हरिवाहिने । महौजस्काय । नित्याय । नित्यात्मकाय । अनलाय । सम्मानिने ।
संसृतये । हारिणे । सर्गिणे । सन्निधये । अन्वयाय । विद्याधराय ।
विमानिने । वैमानिकवरप्रदाय । वाचस्पतये नमः । ३००

ॐ वसासाराय नमः । वामाचारिणे । बलन्धराय । वाग्भवाय ।
वासवाय । वायवे । वासनाबीजमण्डिताय । वासिने । कोलश्रुतये ।
दक्षाय । दक्षयज्ञविनाशनाय । दाक्षाय । दौर्भाग्यघ्ने ।

दैत्यमर्दनाय । भोगवर्धनाय । भोगिने । रोगहराय । हेयाय ।
हारिणे । हरिविभूषणाय नमः । ३२०

ॐ वहुरूपाय नमः । वहुमतये । बहुवित्ताय । विचक्षणाय ।
नृत्यकृते । चित्तसन्तोषाय । नृत्तगीतविशारदाय ।
शरद्वर्णविभूषाढ्याय । गलदग्धाय । अघनाशनाय । नागिने ।
नागमयाय । अनन्ताय । अनन्तरूपाय । पिनाकभृते । नटनाय ।
हाटकेशानाय । वरीयसे । विवर्णभृते । झाङ्कारिणे नमः । ३४०

ॐ टङ्कहस्ताय नमः । पाशिने । शार्ङ्गिने । शशिप्रभाय ।
सहस्ररूपाय । समगवे । साधूनामभयप्रदाय । साधुसेव्याय' ।
साधुगतये । सेवाफलप्रदाय । विभवे । सुमघ्ने । मद्यपाय ।
मत्ताय । मत्तमूर्तये । सुमन्तकाय । कीलिने । लीलाकराय । लूताय ।
भववन्धैकमोचनाय नमः । ३६०

ॐ रोचिष्णवे नमः । विष्णवे । अच्युताय । चूतनाय । नूतनाय ।
नवाय । न्यग्रोधरूपाय । भयदाय । भयघ्ने । अभीतिधारणाय ।
धरणीधरसेव्याय । धराधरसुतापतये । धराधराय । अन्धकरिपवे ।
विज्ञानिने । मोहवर्जिताय । स्थाणुकेशाय । जटिने । ग्राम्याय ।
ग्रामारामाय नमः । ३८०

ॐ रमाप्रियाय नमः । प्रियकृते । प्रियरूपाय । विप्रयोगिने ।
प्रतापनाय । प्रभाकराय । प्रभादीप्ताय । मन्युमते । मानवेष्टदाय ।
तीक्ष्णवाहवे । तीक्ष्णकराय । तीक्ष्णांशवे । तीक्ष्णलोचनाय ।
तीक्ष्णचित्ताय । त्रयीरूपाय । त्रयीमूर्तये । त्रयीतनवे । हविर्भुजे ।
हविषांज्योतिषे । हालाहलाय नमः । ४००

ॐ हलीपतये नमः । हविष्मल्लोचनाय । हालामयाय । हरितरूपभृते ।
म्रदिम्ने । आम्रमयाय । वृक्षाय । हुताशाय । हुतभुजे ।
गुणिने । गुणज्ञाय । गरुडाय । गानतत्पराय । विक्रमिने । क्रमिने ।
क्रमेश्वराय । क्रमपराय । क्रमिकृते । क्लान्तमानसाय ।
महातेजसे नमः । ४२०

ॐ महामाराय नमः । मोहिताय । मोहवल्लभाय । महस्विने । त्रिदशाय ।
बालाय । बालापतये । अघापहाय । बाल्याय । रिपुहराय । हाहिने । गोवये ।
गविमताय । अगुणाय । सगुणाय । वित्तराजे । वीर्याय । विरोचनाय ।

विभावसवे । मालामयाय नमः । ४४०

ॐ माधवाय नमः । विकर्तनाय । विकत्थनाय । मानकृते ।
मुक्तिदाय । अतुल्याय । मुख्याय । शत्रुभयङ्कराय । हिरण्यरेतसे ।
सुभगाय । सतीनाथाय । सिरापतये । मेढ्रिणे । मैनाकभगिनीपतये ।
उत्तमरूपभृते । आदित्याय । दितिजेशानाय । दितिपुत्रक्षयङ्कराय ।
वसुदेवाय । महाभाग्याय नमः । ४६०

ॐ विश्वावसवे नमः । वसुप्रियाय । समुद्राय । अमिततेजसे ।
खगेन्द्राय । विशिखिने । शिखिने । गरुत्मते । वज्ररहस्ताय ।
पौलोमीनाथाय । ईश्वराय । यज्ञपेयाय । वाजपेयाय । शतक्रतवे ।
शताननाय । प्रतिष्ठाय । तीव्रविस्रम्भिणे । गम्भीराय ।
भाववर्धनाय । गायिष्ठाय नमः । ४८०

ॐ मघुरालापाय नमः । मघुमत्ताय । माधवाय । मायात्मने ।
भोगिनां त्रात्रे । नाकिनामिष्टदायकाय । नाकीन्द्राय । जनकाय ।
जन्याय । स्तम्भनाय । रम्भनाशनाय । शङ्कराय । ईश्वराय ।
ईशाय । शर्वरीपतिशेखराय । लिङ्गाध्यक्षाय । सुराध्यक्षाय ।
वेदाध्यक्षाय । विचारकाय । भर्गाय नमः । ५००

ॐ अनर्घ्याय नमः । नरेशानाय । नरवाहनसेविताय । चतुराय ।
भवित्रे । भाविने । भावदाय । भवभीतिघ्ने । भूतेशाय । महिताय ।
रामाय । विरामाय । रात्रिवल्लभाय । मङ्गलाय । धरणीपुत्राय ।
धन्याय । वुद्धिविवर्धनाय । जयिने । जीवेश्वराय । जाराय नमः । ५२०

ॐ जाठराय नमः । जह्नुतापनाय । जह्नुकन्याधराय । कल्पाय ।
वत्सराय । मासरूपधृते । ऋतवे । ऋभुसुताध्यक्षाय । विहारिणे ।
विहगाधिपाय । शुक्लाम्बराय । नीलकण्ठाय । शुक्लाय । भृगुसुताय ।
भगाय । शान्ताय । जिवप्रदाय । अभेद्याय । अभेदकृते ।
शान्तकृते नमः । ५४०

ॐ पतये नमः । नाथाय । दान्ताय । भिक्षुरूपिणे । दातृश्रेष्ठाय ।
विशां पतये । कुमाराय । क्रोधनाय । क्रोधिने । विरोधिने । विग्रहिने ।
रसाय । नीरसाय । सरसाय । सिद्धाय । वृषणिने । वृषघातनाय ।
पञ्चास्याय । षण्मुखाय । विमुखाय नमः । ५६०

ॐ सुमुखीप्रियाय नमः । दुर्मुखाय । दुर्जयाय । दुःखिने । सुखिने ।

सुखविलासदाय । पात्रिणे । पौत्रिणे । पवित्राय । भूतात्मने ।
पूतनान्तकाय । अक्षराय । परमाय तत्त्वाय । बलवते । बलघातनाय ।
भल्लिने । भौलये । भवाभावाय । भावाभावविमोचनाय ।
नारायणाय नमः । ५८०

ॐ मुक्तकेशाय नमः । दिग्देवाय । धर्मनायकाय । कारामोक्षप्रदाय ।
अजेयाय । महाङ्गाय । सामगायनाय । तत्सङ्गमाय । नामकारिणे ।
चारिणे । स्मरनिसूदनाय । कृष्णाय । कृष्णाम्बराय । स्तुत्याय ।
तारावर्णाय । त्रपाकुलाय । त्रपावते । दर्गतित्रात्रे । दुर्गमाय ।
दुर्गघातनाय । महापादाय । विपादाय । विपदां नाशकाय । नराय ।
महाबाहवे । महोरस्काय । महानन्दप्रदायकाय । महानेत्राय । महादात्रे ।
नानाशास्त्रविचक्षणाय । महामूर्ध्ने । महादन्ताय । महाकर्णाय ।
महोरगाय । महाचक्षुषे । महानासाय । महाग्रीवाय । दिगालयाय ।
दिग्वाससे । दितिजेशानाय नमः । ६२०

ॐ मुण्डिने नमः । मुण्डाक्षसूत्रभृते । श्मशाननिलयाय । अरागिणे ।
महाकटये । अनूतनाय । पुराणपुरुषाय । अपाराय । परमात्मने ।
महाकराय । महालस्याय । महाकेशाय । महोष्ठाय । मोहनाय । विराजे ।
महामुखाय । महाजङ्घाय । मण्डलिने । कुण्डलिने । नटाय । असपत्नाय ।
पत्रकराय । पात्रहस्ताय । पाटवाय । लालसाय । सालसाय । सालाय ।
कल्पवृक्षाय । कम्पिताय । कम्पघ्ने । कल्पनाहारिणे । महाकेतवे ।
कटोरकाय । अनलाय । पवनाय । पाठाय । पीठस्थाय । पीठरूपकाय ।
पाठीनाय । कुलिशिने नमः । ६६०

ॐ पीनाय नमः । मेरुधाम्ने । महागुणीने । महातूणीरसंयुक्ताय ।
देवदानवदर्पघ्ने । अथर्वशीर्षाय । सोम्यास्याय ।
ऋक्सहस्रामितेक्षणाय । यजुःसाममुखाय । गुह्याय ।
यजुर्वेदविचक्षणाय । याज्ञिकाय । यज्ञरूपाय । यज्ञज्ञाय ।
धरणीपतये (यज्ञघ्नो) । जङ्गमिने । भङ्गदाय । भाषादक्षाय ।
अभिगमदर्शनाय । अगम्याय नमः । ६८०

ॐ सुगमाय नमः । खर्वाय । खेटिने । खेटाननाय । नयाय खेटाननो) ।
अमोघार्थाय । सिन्धुपतये । सैन्धवाय । सानुमध्यगाय । प्रतापिने ।
प्रजयिने । प्रातर्मध्याह्नसायमध्वराय । त्रिकालज्ञाय । सुगणकाय ।

पुष्करस्थाय । परोपकृते । उपकर्त्रे । अपहर्त्रे । घृणीने ।
रणजयप्रदाय नमः । ७००

ॐ धर्मिणे नमः । चर्माम्बराय । चारुरूपाय । चारुविभूषणाय ।
नक्तञ्चराय । कालवशिने । वशिने । वशिवराय । अवशाय ।
वक्ष्याय । वक्ष्यकराय । भस्मशायिने । भस्मविलेपनाय ।
भस्माङ्गिने । मलिनाङ्गाय । मालामण्डितमूर्धजाय । गणकार्याय ।
कुलाचाराय । सर्वाचाराय । सख्यै नमः । ७२०

ॐ समाय नमः । साकाराय । गोत्रभिदे । गोप्त्रे । भीमरूपाय ।
भयानकाय । अरुणाय । एकचिन्त्याय । त्रिशङ्कवे । शङ्कुधारणाय ।
आश्रमिणे । ब्राह्मणाय । वज्रिणे । क्षत्रियाय । कार्यहेतुकाय ।
वैक्ष्याय । शूद्राय । कपोतस्थाय । त्वष्ट्रे । तुष्टाय नमः । ७४०

ॐ रुषाकुलाय नमः । रोगिने । रोगापहाय । शूराय । कपिलाय ।
कपिनायकाय । पिनाकीने । अष्टमूर्तये । क्षितिमते । धृतिमते ।
जलमूर्तये । वायुमूर्तये । हुताशाय । सोममूर्तिमते । सूर्यदेवाय ।
यजमानाय । आकाशाय । परमेश्वराय । भवघ्ने । भवमूर्तये नमः । ७६०

ॐ भूतात्मने नमः । भूतभावनाय । भवाय । शर्वाय । रुद्राय ।
पशुनाथाय । शङ्कराय । गिरिजाय । गिरिजानाथाय । गिरीन्द्राय ।
महेश्वराय । गिरीशाय । खण्डहस्ताय । महते । उग्राय । गणेश्वराय ।
भीमाय । कपर्दिने । भीतिज्ञाय । खण्डपाय नमः । ७८०

ॐ चण्डविक्रमाय नमः । खण्डभृते । खण्डपरशवे । कृत्तिवाससे ।
विषापहाय । कङ्कालाय । कलनाकाराय । श्रीकण्ठाय । नीललोहिताय ।
गणेश्वराय । गुणिने । नन्दिने । धर्मराजाय । दुरन्तकाय ।
भृङ्गिरीटिने । रसासाराय । दयालवे । रूपमण्डिताय । अमृताय ।
कालरुद्राय नमः । ८००

ॐ कालघ्नये नमः । शशिशेखराय । सद्योजातस्वर्णमुञ्जमेखलिने ।
दुर्निमित्तहृते । दुःस्वप्नहृते । प्रसहनाय । गुणिने ।
नादप्रतिष्ठिताय । शुक्लाय । त्रिशुक्लाय । सम्पन्नाय । शुचये ।
भूतनिषेविताय । यज्ञरूपाय । यज्ञमुखाय । यजमानेष्टदाय ।
शुचये । धृतिमते । मतिमते । दक्षाय नमः । ८२०

ॐ दक्षयज्ञविघातकाय नमः । नागहारिणे । भस्मधारिणे ।

भूतिभूषितविग्रहाय । कपालिने । कुण्डलिने । भर्गाय ।
भक्तार्तिभञ्जनाय । विभवे । वृषध्वजाय । वृषारूढाय ।
धर्मवृषविवर्धकाय । महाबलाय । सर्वतीर्थाय ।
सर्वलक्षणलक्षिताय । सहस्रबाहवे । सर्वाङ्गाय । शरण्याय ।
सर्वलोककृते । पवित्राय नमः । ८४०

ॐ त्रिककुन्मन्त्राय नमः । कनिष्ठाय । कृष्णपिङ्गलाय ।
ब्रह्मदण्डविनिर्मात्रे । शतघ्नीपशशक्तिमते । पद्मगर्भाय ।
महागर्भाय । ब्रह्मगर्भाय । जलोद्भवाय । देवासुरविनिर्मात्रे ।
देवासुरपरायणाय । देवासुरगुरवे । देवाय । देवासुरनमस्कृताय ।
गुहप्रियाय । गणसेव्याय । पवित्राय । सर्वपावनाय । ललाटाक्षाय ।
विश्वदेवाय नमः । ८६०

ॐ दमनाय नमः । श्वेतपिङ्गलाय । विमुक्तये । मुक्तितेजस्काय ।
भक्तानां परमायै गतये । देवातिदेवाय । देवर्षये ।
देवासुरवरप्रदाय । कैलासगिरिवासिने । हिमवद्गिरिसंश्रयाय ।
नाथपूज्याय । सिद्धनुत्याय । नवनाथसमर्चिताय । कपर्दिने ।
कल्पकृते । रुद्राय । सुमनसे । धर्मवत्सलाय । वृषाकपये ।
कल्पकर्त्रे नमः । ८८०

ॐ नियतात्मने नमः । निराकुलाय । नीलकण्ठाय । धनाध्यक्षनाथाय ।
प्रमथनायकाय । अनादये । अन्तरहिताय । भूतिदाय । भूतिविग्रहाय ।
सेनाकल्पाय । महाकल्पाय । योगाय । युगकराय । हरये । युगरूपाय ।
महारूपाय । महागीताय । महागुणाय । विसर्गाय । लिङ्गरूपाय नमः । ९००

ॐ पवित्राय नमः । पापनाशनाय । ईड्याय । महेश्वराय । शम्भवे ।
देवसिंहाय । नरर्षभाय । विबुधाय । अग्रवराय । सूक्ष्माय ।
सर्वदेवाय । तपोमयाय । सुयुक्ताय । शोभनाय । वज्रिणे । देवानां
प्रभवाय । अव्ययाय । गुहाय । कान्ताय । निजसर्गाय नमः । ९२०

ॐ पवित्राय नमः । सर्वपावनाय । शृङ्गिणे । शृङ्गप्रियाय ।
बभ्रवे । राजराजाय । निरामयाय । देवासुरगणाध्यक्षाय ।
नियमेन्द्रियवर्धनाय । त्रिपुरान्तकाय । श्रीकण्ठाय । त्रिनेत्राय ।
पञ्चवक्त्रकाय । कालहृते । केवलात्मने । ऋग्यजुःसामवेदवते ।
सर्वभूतानामीशानाय । सर्वरक्षसां ईश्वराय । ब्रह्माधिपतये ।

ब्रह्मपतये नमः । ९४०

ॐ ब्रह्मणोऽधिपतये नमः । ब्रह्मणे । शिवाय । सदानन्दिने । सदानन्ताय । सदाशिवाय । मे अस्तु रूपाय । चार्वङ्गाय । गायत्री रूपधारणाय । अघोरेभ्यः । घोरेभ्यः । घोरघोरतरेभ्यः । सर्वतःशर्वसर्वेभ्यः । रुद्ररूपेभ्यः । वामदेवाय । ज्येष्ठाय । श्रेष्ठाय । कालाय । करालकाय । महाकालाय नमः । ९६०

ॐ भैरवेशाय नमः । वेशिने । कलविकारणाय । बलविकारणाय । बलाय (बालाय) । बलप्रमथनाय । सर्वभूतादिदमनाय । देवदेवाय । मनोन्मनाय । सद्योजाताय । भवोद्भवाय । भावनाय । भवनाय । भाव्याय । बलकारिणे । परस्मै पदाय । परस्मै शिवाय । परस्मै ध्येयाय । परस्मै ज्ञानाय । परात्पराय । पारावराय । पलाशिने । मांसाशिने । वैष्णवोत्तमाय । ॐ ऐं ह्रीं श्रीं ह्सौः देवाय । ॐ श्रीं ह्रौं भैरवोत्तमाय । ॐ ह्रां नमः शिवायेति मन्त्राय । वटवे । वरायुधाय । ॐ ह्रीं सदाशिवाय । ॐ ह्रीं आपदुद्धारणाय मनवे । ॐ ह्रीं महाकरालास्याय । ॐ ह्रीं बटुकभैरवाय । ॐ ह्रीं भगवतेत्र्यम्बकाय । ॐ ह्रीं चन्द्रार्धशेखराय । ॐ ह्रीं सञ्जटिलाय धूम्राय । ॐ ह्रीं त्रिपुरघ्नातनाय । ॐ ह्रां ह्रीं हुं हरिवामाङ्गाय । ॐ ह्रीं हुं ह्रीं त्रिलोचनाय । ॐ वेदरूपाय नमः । १०००

ॐ वेदज्ञाय नमः । ऋग्यजुःसाममूर्तिमते । रुद्राय । घोररवाय । अघोराय । ॐ क्ष्म्यूं अघोरभैरवाय । ॐ जुं सःपीयूषसक्ताय । अमृताध्यक्षाय । अमृतालसाय । ॐ त्र्यम्बकं मामृतात् ॐ ह्रौं जुं सः ॐ भूर्भुवः सुवः ॐ जुं सः मृत्युञ्जयाय नमः । १०१०

॥ इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये
मृत्युञ्जयसहस्रनामावलिः समाप्ता ॥

Proofread by Malathi Ravi

*mRityunjayasahasranAmAvaliH*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*